श्रीः

पुरुषसूक्तभाष्यम् *

प्रसङ्गात् पुरुषसूक्तभाष्यमपि लिख्यते (?) ।
तयः सर्पसंमूर्तिविमूर्तिपरिमूर्तय ॥
पुरुषाय नमस्तस्मै परस्मै विश्वयात्मने ।
तं प्रणम्यादिपुरुषं जगतामादिकारणम् ॥
दुर्ज्ञानं पौरुष सूक्तं व्याकरोमि यथामति ।

श्रीपाद्मे पुराणे— 'इदं पुरुषसूक्तं हि सर्ववेदेषु पठ्यते ॥
अतः श्रुतिभ्यः सर्वाभ्यो बलवत् समुदीरितम् ।
इद पुरुषसूक्तं हि यजुष्यष्टादशर्चकम ॥
ऋग्वेदे षोडशर्चं स्यात् पञ्च वाजसनेयके ।
सामवेदे तु सप्तर्चं तथैवाथर्वणेऽपि च ॥
वेदेषु याजुषं वेदमवलम्ब्य वदाम्यहम् ।
मदर्वाचीनता प्रेक्ष्य नोपेक्षन्तां मनीषिणः ॥
श्रुतिषु प्रबला[मन्त्रा ?]स्तेष्वप्यध्यात्मवादिनः ।

---

*मद्रनगरीय—अडैयारकोशालये इदं पुरुषसूक्तभाष्यमन्यकर्तृकत्वेन प्रकाशितमिदानीम् । तथैव स्वीकारेऽपि न क्षतिः । श्रीरङ्गरामानुजस्वामिकृतत्वेन क्वचित् निर्देशस्तु उपनिषदां भाष्यमिवेदमप्येतत्कृतं स्यादिति ऊहमात्रेणेति तदा वक्तव्यम् । व्याख्यानशैल्यपि विभिन्नरूपैव लक्ष्यते । अथाप्यवश्यादरणीयत्वात् मुद्रणं स्थाने । अशुद्धिबहुलैव मातृकाऽत्रोपलब्धा । अथापि यथाशक्ति शोधनं कृत्वा प्रकाश्यते । मद्रनगरप्राच्यमातृकाकोशालये मातृका द्रष्टव्या ।
अत्र प्रसङ्गादित्युपक्रमात् इतः प्राक् प्रणीतं किमिति विमृश्यम् ।

तत्रापि पौरुषं सूक्तं न तस्माद् विद्यते परम् ॥

(ऋषिच्छन्दोदेवताविनियोगफलप्रदर्शनम्)

तत्रैव, भगवान् शौनकः—

....पुरुषसूक्तस्य ऋषिर्नारायणः स्मृतः ।
छन्द आनुष्टुभं सूक्तं तिस्रोऽन्त्यास्त्रिष्टुभो मताः ॥
परमयोमवासी च पुरुषो देवताऽभवत् ।
प्रथमां विन्यसेत् वामे द्वितीयां दक्षिणे करे ॥
तृतीयां वामपदे च चतुर्थीं दक्षिणे तथा ।
पञ्चमीं वामजानौ तु षष्ठीं दक्षिणके तथा ॥
सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा ।
नवमीं नाभिदेशे तु दशमीं हृदये तथा ॥
एकादशीं कण्ठदेशे द्वादशीं वामबाहुके ।
त्रयोदशीं दक्षिणे तु आस्यदेशे चतुर्दशीम् ॥
अक्ष्णोः पञ्चदशीं न्यस्य षोडशीं मूर्ध्नि विन्यसेत् ।
एवं न्यासविधिं कृत्वा पश्चाज्ञानि समालभेत् ॥
प्रायश्चित्ते जपे चैव विष्णोराराधने तथा ।
मोक्षे वश्येऽभ्युपस्थाने सुपुत्रप्रापणेऽपि च ॥
सर्वकामफलावाप्तावारोग्ये मृत्युनाशने ।
एतेष्वर्थेष्विदं सूक्तं मुनयो विनियुञ्जते ॥

प्रायश्चित्त...द्राघूल —'यत्रयत्र कर्मभ्रेषो यजुर्भ्रेषो वा, तत्रतत्र पुरुषं

ध्यायेत । पुरुषसूक्तमुच्चरेत् । पूर्णत्वात् पुरुष इति विज्ञायते ।

यमस्मृतौ— अग्नयज्ञे जपेत् सूक्त पौरुष चिन्तयन् हरिम् ।
स सर्वान् जपते वेदान् साङ्गोपाङ्गान् द्विजोत्तम ॥
जप्त्वा तु पौरुष सूक्त मुच्यते गुरुतल्पग ।
सकृज्जप्त्वास्यवामीय शिवसङ्कल्पमेव च ॥
जप्त्वा तु पौरुष सूक्त मुच्यते गुरुतल्पग ॥

बोधायनम्—मातृदुहितृस्नुषास्वसृसवर्णाविधवागमनादौ जले निमज्जन् चिन्तयन् पुरुष सूक्त त्रिरुच्चारयेत्, तदानीमेव पूतो भवति । विप .. .. स्नात पवित्राणि यथाशक्ति जपेत् विशेषत .. शब्दाभ्यां सदृशीभि ॥

ऋग्विधाने शौनको वदति—

'पुरुषस्य हरे सूक्त सर्वपापप्रणाशनम् ।
वक्ष्ये पुरुषसूक्तस्य विधान चार्चन प्रति ॥
आद्ययाऽऽवाहयेद्देवमृचा तु पुरुषोत्तमम् ।
द्वितीययाऽऽसन दद्यात् पाद्य चापि तृतीयया ॥
चतुर्थ्याऽर्घ्यं प्रदातव्य पञ्चम्याऽऽचमनीयकम् ।
षष्ठ्या स्नान प्रकुर्वीत सप्तम्या वस्त्रमेव च ॥
यज्ञोपवीतमष्टम्या नवम्या गन्धमेव च ।
दशम्या पुष्पदान स्यात् एकादश्या तु धूपकम् ॥
द्वादश्या दीपदान स्यात् त्रयोदश्या हविस्तथा ।

चतुर्दश्याऽञ्जलिं कुर्यात् पञ्चदश्या प्रदक्षिणम् ॥
षोडश्योद्वासनं कुर्यात् एवमाराधयेत् हरिम् ।
स्नाने वस्त्रे निवेद्ये च दद्यादाचमनीयकम् ॥
दद्यात् पुरुषसूक्तेन यः पुष्पाण्यप एव वा ।
अर्चितं स्याज्जगदिदं तेन सर्वं चराचरम् ॥

मोक्षे योगवासिष्ठे—*

'संसारान्मोक्षमिच्छन् यः सन्त्यजेदेषणात्रयम् ।
निस्पृहः सर्वकामेभ्यः समलोष्टाश्मकाञ्चनः ॥
गुरोः पादौ तु संगृह्य स्वाचम्य प्रयतो भवेत् ।
मनश्च पावनं कृत्वा सन्त्यजेदेषणात्रयम् ॥
ततो गच्छन् हरेर्वेश्म पावनं सुमनोहरम् ।
ततो मनोगतान् कामान् सर्वान् त्यक्त्वा प्रसन्नधीः ॥
अनिकेतः स्थिरमतिरादिदेवे जनार्दने ।
येन केन चिदाच्छन्नो येन केनचिदाशितः ॥
मेघच्छन्न इवाऽऽदित्यो भस्मच्छन्न इवानलः ।
आत्मानं गूहमानस्तु सर्वभूतदयान्वितः ॥
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी ।
एकान्ती यतचित्तात्मा त्यक्तसर्वपरिग्रहः ॥
ध्यायन् नारायणं देवं हृदयाम्भोजमध्यगम् ।

---

*ज्योतिरधिकरणश्रुतप्रकाशिकायां योगवासिष्ठात् वचनान्तरमुदाहृतम् ।

दिग्देशकालावस्थाद्यैरनवच्छेद्यवैभवम् ॥
सर्वदा पौरुषं सूक्तं मनसैव जपेच्छुचिः ॥' इति ।

किञ्च, योगवासिष्ठे —

'यः पौरुषस्य सूक्तस्य जानात्यर्थं यथा तथा ।
स जन्मनीह मुक्तस्स्यात्, पुराणेषु च दर्शनात् ॥
विष्णुः पुरुषसूक्तार्थः पुरुषोऽध्यवसीयते ।'

उत्तरभागाध्याये—

'सर्वं वशं मम भवेदिति सञ्चिन्तयन् मुनिः ।
जपेत्तु पौरुषं सूक्तं प्रणिपत्य जनार्दनम् ॥
यद्वशे वर्तते कृत्स्नं चराचरमिदं जगत् ।
वशे भवति तस्येदं जगत् सर्वं मुनेरपि ॥' इति ।

आपस्तम्बः—'सहस्रशीर्षा पुरुष इत्युपहिता पुरुषेण नारायणेन यजमा
उपतिष्ठते' । उपहिताम् = इष्टकाभिः कृतोपधानामित्यर्थः ।

वाधूलसूत्रे— नारायणदृष्टेन पुरुषदैवतेनोपहिता चितिमुपतिष्ठमान इ
जन्मनि पुरुषो भवेदिति—

आयुष्मत्पुत्रावाप्तौ ऋग्विधाने—

'पुत्रेच्छुर्ब्राह्मणः शुद्धः सुप्रसन्नमना भवेत् ।
पौरुषेण च सूक्तेन जुहुयादाज्यमन्वहम् ॥
पायसान्नं चरुं कृत्वा तेनैव जुहुयाच्छुचिः ।
हुतशिष्टं चरुं शुद्धमश्नीयातां च दम्पती ॥
एवं त्रिंशद्दिनादूर्ध्वं गर्भो भवति सुस्थितः ।

सर्वलक्षणसपन्न पुत्रो भवति पावन ॥' इति ।

श्रीशास्त्रे—सर्वकामावाप्त्यादिषु पुरुषसूक्तसमाराधनेन अचिरात् सर्वान् कामान् आप्नोतीति ॥

(पुरुषसूक्तावतारणम्)

एव छन्दास्यृषीन् देव विनियोग तथा फलम् ।
उक्त्वा तु पौरुषं सूक्तमवतारयितुं यते ॥

श्रीशास्त्रे— पुरुषसूक्तसहिताया भगवान् सनत्कुमारो नारदमुनये भगवद्ज्ञानमुपदिशन् पुरुषसूक्तमवतारयामास । तत्र नारद परिप प्रच्छ, सर्वव्यापिन पुरुषस्य किमर्थं शरीरपरिग्रह इति ॥ तत्राह—

'पुरा नारायणो देव कृपया परयाऽन्वित ।
देवतिर्यङ्मनुष्यादीन् वीक्ष्य ससारमध्यगान् ॥
एव सञ्चिन्तयामास सस्मरन् वैभव स्वकम् ।
स्वत प्रमाणवाक्यानि दुर्विज्ञान वदन्ति माम् ॥
'अणोरणीयान् महतो महीयान्' 'निर्गुणो गुणी ।'
दिग्देशकालावस्थाद्यैरनवच्छेद्यवैभव ॥
वृद्धिक्षयविहीनश्च सत्यकामो निरञ्जन ।
विनेन्द्रियेण सर्वज्ञो विना पादेन सर्वग ॥
अनासोऽनुभवन् गन्धान् स्पृशन् सर्वमपाणिक ।
शृण्वन् श्रुतिं विना शब्दमजिह्वो लेलिहन् रसम् ॥
साधनेन विना साध्यं सर्वं संसाधये ऽहम् ।
तस्मात् सर्वप्रमाणैस्तु सुदुर्ज्ञानतरो ऽहम् ॥

मम रूपमविज्ञाय लोके मोक्षो न सिध्यति ।
तस्मात् संसारचक्रेऽस्मिन् भ्राम्यन्त्येते सुदुस्तरे ॥
उद्धरेयमिमान् सर्वान् यातायातशताकुलान् ।
इति संचिन्त्य मनसा स्वच्छन्दोपात्तविग्रहम् ॥
हित्वौपनिषदं रूपं प्रमाणानामगोचरम् ।
सर्वेषां स्तुतिभिर्योऽयं दृष्टमात्रेण मोक्षदम् ॥
सर्वकल्याणसंपूर्णं गुणराशिसमाश्रयम् ।
सहस्रावयवोपेतमाददे रूपमद्भुतम् ॥' इति ।

ब्रह्माण्डपुराणे क्षीराब्धिवर्णने—

उक्तश्च—न ते रूपमित्यादि—

'सहस्रकन्धरं चारु तुङ्गोरस्स्थलमुन्नतम् ।
सहस्रबाहुसंयुक्तमिन्दिरावरमन्दिरम् ॥' इति च ॥

श्रीभूमी यस्य देव्यौ सकलमुनिवराः किंकराः रक्ष्यमण्डं
सृष्टयाद्याः शिल्पलीलाः विधिमुखविबुधाः पुत्रपौत्रादयोऽपि ।
वैकुण्ठं नाम धाम स्तुतिकृदुपनिषत् शासनं शास्त्रवर्गः
सोऽयं वैकुण्ठ [नाथ ?] श्रियमतिशयिनीं वैष्णवीं वो ददातु ॥

तदयं पुरुषसूक्तभाष्यपरिष्कारे संग्रहः

ऋग्वेदे षोडशर्चं प्रथितहरिपरं पौरुषं सूक्तमेतत्
सप्तर्चं साम्नि चाथर्वणवचसि यजुष्येव चाष्टादशार्चम् ।
अर्चास्वावाहनादौ विशदमृच इमाः ऋत्विग्विधाने नियुक्ताः
आयुष्मत्पुत्रकाम्याहुति-वृजिनहति-ब्रह्मयज्ञादिके च ॥

श्रीः

श्रीमते पुरुषाय नमः

पुरुषसूक्तम् ।

हरिः ओम् । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

सहस्रशीर्षा पुरुषः....। सहस्रशब्दोऽनन्तवचनः । सहस्राणि

श्रीमद्भ्यो रङ्गरामानुजमहादेशिकेभ्यो नमः ।

पुरुषसूक्तभाष्यपरिष्कारः ॥

यो हि व्यूह्य विरिञ्चादि सृजत्याश्रितमुक्तिदः ।
महते पुरुषायास्मै परस्मै श्रीमते नमः ॥ १ ॥

अयि हृदय ! किमर्थं क्लिश्यसे कल्मषाणां
हरणमतिपवित्रं पौरुषं सूक्तमस्ति ।
अधिगमयति यस्याऽऽलोड्य सर्वं प्रमेयं
यतिपतिमतकर्मभ्यादरोऽभिज्ञवर्गः ॥ २ ॥

सर्वत्र वेदे श्रुतमादरार्हं स्मृतीतिहासादिविवेचितार्थम् ।
शारीरके सूक्तमिदं न नूनं मीमांसितं ब्रह्मपरत्वदार्ढ्यात् ॥ ३ ॥

यद्यपि ज्योतिरधिकरणश्रुतप्रकाशिकायाम्, 'पुरुषसूक्तं कस्मात् सूत्रकारेण न निरूपितमित्याशङ्क्य, संदेहाभावादिति समाहितम्- अथापि चिदचिद्विलक्षणपुरुषविशेषपरत्वविषये संशयलेशस्याप्यभावेऽपि तत्तन्मन्त्रघटकपदवाक्यार्थतद्योजनाप्रकारनिर्धारणं दुष्करमेव लक्ष्यते । अथर्ववर्णनार्थप्रवृत्तेषु उपनिषत्स्मृतीतिहासपञ्चरात्रग्रन्थेषु नैकरूप्यमुपलभ्यते । अधिकृतमधुगयुज्यमानस्य चास्यार्थोऽवश्यमेवाधिगन्तव्यः। 'योऽर्थज्ञ इत् सकलं भद्रमश्नुते' इति च श्रुतिः । अत इदमपि सूक्तं भाषितमस्ति । अत्रोपक्रमे प्रसङ्गादिति निर्देशात् किमिदं भाष्यं ग्रन्थान्तरमध्यनिविष्टम्, स्वतन्त्रं वेति विमृश्यमस्ति । ग्रन्थान्तेऽपि द्रष्टव्यम् । विस्तरेण पीठिकां विधाय व्याख्यातुमारभते सहस्रेति ।

शिरांसि, सहस्राण्यक्षीणि, सहस्रं पादाः यस्य स **सहस्रशीर्षा सहस्राक्षः सहस्रपादुक्तः**। 'शीर्षन् छन्दसि' इति शिरश्शब्दस्य शीर्षन्नादेशः। गीयते हि, 'अनन्तबाहूदरवक्त्रनेत्रम्' इति। **पादशब्दः** उपलक्षणार्थः। 'सर्वतः पाणिपादं तत् सर्वतोक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति॥' इति। मन्त्रान्तर च भवति, 'विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्' इति। [एवं प्रसिद्धाः]पादादयो (1) भगवत एव सङ्कल्पविकल्पकल्पिताप्राकृततेजोमयदेहगता [इह] उच्यन्ते। (2) यद्वा त्रैलोक्यशरीरत्वादस्य सुरनरतिर्यग्गताः पादादयः तदीया इत्युपचर्यन्ते। (3) यद्वा पादादिकार्यगमनदर्शनवचनादिलक्षणार्थः। तेन सहस्रपात्त्वेन सर्वगतत्वं, सहस्राक्षत्वेन सर्वदर्शित्वं, सहस्रशीर्षत्वेन सर्वाधारत्वञ्च, सर्वलोकाभिषिक्तत्वञ्च सर्वसुखप्रदानत्वम् (ञ्च?) सर्वरक्षणप्रतिश्रवणत्वञ्च सर्वरक्षापेक्षाश्रवणत्वञ्च, (?) केशादिपादान्तो (न्तमु?)क्तत्वात् सर्वावयवत्वेऽपि (वेष्वपि?) सहस्रत्वं चोक्तम्। अक्षोपलक्षणेन पञ्चेन्द्रियत्वो(त्वमु)क्तं सिद्धम्। तथा च श्रुति–'अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इति। 'गामाविश्य च भूतानि धारयाम्यहमोजसा' इत्यादि च। यद्वा सर्वाधिकत्वं सर्वज्ञत्वं सर्वशक्तित्वं च सिद्धम्।

(1) [1]पुराणत्वात् पुरुषः। तथा च श्रूयते—'अन्तरतः कूर्मं भूतं सर्पन्तं तमब्रवीत्। मम वै त्वङ्माँसा समभूत्। नेत्यब्रवीत्-[पुनश्च

1 विशेषणपदानि त्रीणि प्रथमं बहुधा व्याख्याय पुरुषपदं व्याख्याति पुराणेति।

भगवान् कूर्मरूप प्रत्याह ।] — पूर्वमेवाहमिहासमिति । तत् पुरुषस्य पुरुषत्वम्। सहस्रशीर्षा पुरुष । सहस्राक्ष सहस्रपाद् भूत्वोदतिष्ठत्' इति।
(2) यद्वा पूर्णत्वात् पुरुष । तेनेद पूर्णं पुरुषेण सर्वम्' इति श्रुते ।
(3) यद्वा शरीराख्ये पुरि शयनात् पुरुषः । शकारस्य षकारादेश ।
श्रीविष्णुस्मृतौ—'पुरमाक्रम्य सकल शेते यस्मान्महाप्रभु ।
तस्मात् पुरुष इत्येष प्रोच्यते तत्त्वचि तकै ॥' इति।

(4) यद्वा **पुरु**शब्दो बहुपर । वन षण सम्भक्तौ । बहूना बहुभिर्वा भजनात् **पुरुषः** । (5) यद्वा— षण दाने । बहुदानात् **पुरुषः** ।
[1]एतद्गुणोपेतो भगवान् वासुदेव नान्य इत्यर्थ ।

पाद्मे पुराणे— भगवानिति शब्दोऽय तथा पुरुष इत्यपि ।
निरुपाधी च वर्तेते वासुदेवे सनातने ॥
सर्वलोकप्रतीत्या च पुरुष प्रोच्यते हरि ।
त विना पुण्डरीकाक्ष नान्य पुरुषशब्दभाक् ॥
ब्रह्माद्या देवता सर्वा यक्षतुम्बुरुकिन्नरा ।
ते सर्वे पुरुषाशत्वादुच्यन्ते पुरुषा इति ॥' इति ।

श्रीमदुत्तररामायणे अगस्त्यवचनम्—
असौ रामो महाबाहुरतिमानुषचेष्टया ।
तेजोमहत्तया वाऽपि सस्मारयति पूरुषम् ॥ इति ।

श्रीहरिवंशे— 'गोवर्धनादिधरणात् नाथ ' न दसुतोऽपि सन् ।

---

1 एतद्गुणेति । पुराणत्व-पूर्णत्व-पुरशयन-बहुसेवितत्व-बहुप्रदायित्वरूपपुरुषशब्दार्थपञ्चक तदन्यपूर्वोक्तसर्वस्यर्थ ।

स भूमि विश्वतो वृत्वा अत्यतिष्ठद् दशाङ्गुलम् ॥ १ ॥

पुरुषस्यांशसंभूतं त्वां वयं निरणैष्म हि ॥' इति ।

स्कन्दपुराणे— 'यथा भास्करशब्दोऽयमादित्ये प्रतितिष्ठति ।
यथा चाग्नौ बृहद्भानुर्यथा वायौ सदागतिः ॥
यथा पुरुषशब्दोऽयं वासुदेवेऽवतिष्ठते ।
तथा शङ्करशब्दोऽयं महादेवे व्यवस्थितः ॥' इति ।

श्रीविष्णुपुराणे— 'देवतिर्यङ्मनुष्येषु पुन्नामा भगवान् हरिः ।
श्रीनाम्नी लक्ष्मीर्मैत्रेय ! नानयोर्विद्यते परम् ॥' इति ।

श्रीनारसिंहे— स एव वासुदेवोऽयं पुरुषः प्रोच्यते बुधैः ।
प्रकृतिस्पर्शराहित्यात् स्वातन्त्र्यात् वैभवादपि ॥ इति ।

वैष्णवे पुराणे — 'स एव वासुदेवोऽयं साक्षात् पुरुष उच्यते ।
स्त्रीप्रायमितरत् सर्वं जगद्ब्रह्मपुरस्सरम् ॥' इति ।

अर्वाचीनाः कवयोऽपि—

'संहृत्य लोकान् पुरुषोऽधिशेते', 'श्रीवत्सलक्ष्मा पुरुषश्च साक्षात्।' 'तमसः परमं तमव्ययं पुरुषं योगसमाधिना रघुः ।', 'हरिर्यथैकः पुरुषोत्तमस्तवः ।' इत्यादिभिर्वचनैः पुरुषो वासुदेव इति सिद्धम् ॥

स भूमिं विश्वतो वृत्वा— एवम्भूतः सः **भूमिं** भूम्यादिलोकजातं **विश्वतः** सर्वतो **वृत्वा** व्याप्य, यद्वा **भूमिं** जगत्कारणं प्रकृतिं **विश्वतः** कार्यवर्गैः सह **वृत्वा** **अत्यतिष्ठत् दशाङ्गुलम्** । यथाऽऽह, 'अणोरणीयान् महतो महीयानिति–'अणुत्वेन महत्त्वेन द्विधा

तिष्ठति केशव । तत्र पौरुषसूक्तेन महत्त्वमुपवर्णितम् ॥' इति । तस्मात् स भूतानि व्याप्य ततोऽधिको भवतीत्यर्थ । एतदुक्त भवति—योऽय सहस्रशीर्षा पुरुष, स पुरुषो भूम्यादिलोकजात व्याप्य तस्माल्लोकजातात् दशाङ्गुलमत्यतिष्ठत् ।

अथ दशाङ्गुलशब्दस्यार्थ उच्यते—

अत्र दशाङ्गुलशब्देन न दशाङ्गुलवचनम्, अपरिच्छिन्नस्य पुरुषस्य [1]परिच्छेदप्रसङ्गात् । तर्हि कोऽर्थ ? उच्यते—

(१) (?) दशदशानन्त्यन्तयोरित्येतस्मिन्नचूप्रत्यय [2]अतिकोटियोजनयोरिति एतस्मिन्नौणादिक उलचूप्रत्यय । तस्मादनन्तयोजनमिदमतीत्यातिष्ठदित्युक्त भवति ।

पाद्मपुराणे भुवनकोशाध्याये—

'भूमेश्च ब्रह्मकोशस्याप्यन्तराळ कियत् ? वद ।
योजनानामनन्तत्वात् दशाङ्गुळमिद विदु ॥' इति ।

सात्वतसंहितायां पुरुषसूक्तार्थे—

सहस्रशब्दोऽनन्तवचन । पुरुषशब्दो वासुदेवपर । भूमिशब्देन भूम्यादयो लोका उच्यन्ते । दशाङ्गुलशब्दोऽनन्तयोजनमाहेति ।

1 परिच्छेदेति। लोकजातमतिक्रम्य अङ्गुलिदशकामित यथा, तथा तिष्ठतीत्युक्तौ परिच्छिन्नत्व स्यादित्यर्थ ।

2 वाक्यमशुद्धम् । एतदर्थस्तु—नात्र तत्पुरुषस्याङ्गुलेरिति अच्प्रत्यय । किं तु अनन्तयोजनेत्यर्थे दशाङ्गशब्दात् औणादिक उलच्प्रत्यय । लोकजातमतिक्रम्यानन्तयोजनस्तिष्ठतीत्यर्थ इति ।

(२) यद्वा अङ्गुल(लि ?)शब्दो गुणपर । दशगुणवस्त्वन्तरभूतानि अनीत्यातिष्ठत् । किं तदिति । [दशोत्तरा आप ?] [1]दशोत्तरो वह्नि, वह्नेर्दशोत्तरो वायु, वायोर्दशोत्तर व्योम, व्योम्नो दशोत्तरोऽहङ्कार, अहङ्काराद् दशोत्तरो महान्, महतो दशोत्तरमव्यक्तम् । समस्तमिह वस्त्वतीत्यातिष्ठदित्यर्थ ।

केचिदेव व्याचक्षते—**दशाङ्गुलशब्दो** हृदयाकाशवाचक । भूम्यादिलोकान् व्याप्य हृदयाकाशमत्यतिष्ठत् । दशाङ्गुळपरिमाण हृदयाकाश अणोरणीयआकारेणान्तरात्मतया अत्यतिष्ठत् । धकारस्य स्थाने तकारश्छान्दस इति अध्यर्थोऽयमतिशब्द इति—तन्न युक्तम् । श्रूयमाणस्यातिशब्दस्य मुख्यार्थसंभवे सति अध्यर्थवचनस्यायुक्तत्वात् । **त्रिश्वत** इति हृदयस्यापि कबलीकृतत्वाच्च । 'अणुत्वेन महत्त्वेन' इत्यादिना, 'दहरादिमवाक्येन तस्याणुत्व प्रदर्शितम्' इति **योगवासिष्ठे** स्पष्टवचनाच्च । दहरशब्द सूक्ष्मपर्याय ।

नन्वेव हि पूर्वमुक्तम्—अय पुरुष इति, सर्वदेशसर्वकाला परिच्छिन्नविध वेष विहाय सर्वेषा दर्शनस्तुतिसमाराधनाद्यर्हं परिच्छिन्न कञ्चन वेषमादत्त इति । प्रत्युतान्यथा वदति, अस्य परिच्छिन्नोऽप्यय वेष प्राप्त पूर्ववदपरिच्छिन्न इति । कथ परिच्छिन्नत्वेन स्तूयत इति ॥

अस्य चोद्यस्य परिहार पाद्मेऽभिहित । स उच्यते—'आदत्ते यादृश रूप जगत् त्रातु पर पुमान् । स तादृशेन रूपेण दुर्ज्ञानो जायते हरि ॥ तथाप्यमूर्त पुरुष स्तोत्रयोग्यो न जायते । त ...

1 दशोत्तराण्यावरणानि यानि चेति स्तोत्ररत्ने श्रीभगवद्यामुनपादा ।

पुरुष एवेदं सर्वं यद् भूतं यच्च भव्यम् ।

... ... नारायणात् निर्वाणाय च कल्पते ॥'

श्रीमात्स्ये अगस्त्यवचनम् —

'तस्यावनिगतस्येह प्रत्यक्षस्यापि ते वपुः ।
न ज्ञायते च तत्त्वेन परं रूपं कुतस्तव ॥
मीनात्मा यादृशोऽसि त्वं तादृशस्त्वमसि प्रभो ।
वयं त्वामीदृश इति वेदितुं नोत्सहामहे ॥'

श्रीमदुत्तररामायणे अगस्त्यवचनम् —

'शरीरे तव पश्यामि जगत् सर्वं रघूद्वह ।
तेजसा च सुदुर्दर्शो मध्याह्न इव भास्कर ' इति ॥

[1]अस्य [स्तोत्रयोग्यत्वाय मूर्तिः । स्वकार्याय तु ?] परिग्रहो न कार्य इत्यर्थः । अशरीरोऽपि सन् सर्वं करोत्येव । इन्द्रियपरिग्रहो न कार्य इत्यर्थः । अनिन्द्रियोऽपि सन् तत्तदिन्द्रियकार्यं करोत्येव । 'अपाणिपादो जवनो गृहीता', 'अन्धो मणिमविन्दत्, तमनङ्गुलिरावयत् । अग्रीव प्रत्यमुञ्चत्' इत्यादि ।

एवं देशतो व्याप्तिमुक्त्वा कालतो व्याप्तिमैश्वर्यं चैवमाह पुरुष एवेदं सर्वमिति । यदिदं वर्तमानं कार्यजातम्, तत् सर्वं पुरुष एव । तदुपादानत्वात् सर्वस्य । न हि कार्यमुपादानेन विनाऽस्ति । **यद्भूतं** अतीतं वस्तु, तदपि पुरुष एव । **यच्च भव्यम्** = भविष्यच्च पुरुष एव ।

1. मूर्तिः स्तुतये भवतीत्युक्तम् । मूर्तिपरिग्रहो न स्वकार्यार्थमित्युच्यतेऽत्र ।

उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ २ ॥

प्रपञ्चपुरुषयोरीश्वरेशित यभावात् समानाधिकरण्यपदेश, 'ग्रामोऽय देवदत्त' इतिवत्। कार्यकारणभावाद्वा, 'पानीय प्राणिना प्राणा' इतिवत्। एवमेव श्रुतिस्मृतीतिहासपुराणेषु सामानाधिकरण्यवादा द्रष्टव्या। 'वासुदेव सर्वम्,' 'सर्वं खल्विद ब्रह्म तज्जलानिति शान्त उपासीत', इति,

'ज्योतींषि शुक्राणि च यानि लोके त्रयो लोका लोकपालास्त्रयी च।
त्रयोऽग्नयश्चाहुतयश्च पञ्च सर्वे देवा देवकीपुत्र एव ॥
सर्वे देवा सर्ववेदा सशास्त्रा सर्वे यज्ञाश्च कृष्ण।
'ज्योतींषि विष्णुर्भुवनानि विष्णुर्वनानि विष्णुर्गिरयो दिशश्च ॥
नद्य समुद्राश्च स एव सर्वं यदस्ति यन्नास्ति च विप्रवर्य ॥' इति।

महाभारते— य एष देवकीपुत्र पुरस्तादवतिष्ठते।
स एव पुरुषो भूत भव्य चापि तथा भवत् ॥'

एवमस्य कालतो व्याप्तिमुक्त्वा अयमेव सृष्टिकार्यजात-चेतन वर्गस्य (?) सर्वदेशकालमोक्षप्रद इत्याह—**उतामृतत्वस्येशान** इति। **उत** किञ्च अयमेव पुरुष **अमृतत्वस्य** मोक्षस्य **ईशानः**। सायुज्यादिचतुर्विधमोक्षप्रदो भवति। 'मोक्षे नित्येऽमृते देवे कीर्तित त्वमृत बुधै' इति नैखण्डुकोक्तत्वात् अमृतशब्दो मोक्षपर्याय। मोक्षस्येशानो भवति। अन्नेन यदतिरोहति, तस्य शरीरवर्तिनो जीवजातस्य मोक्ष प्रति भगवानेवेष्ट यत् कार्यजातमन्नेन अदनीयेन भोग्यद्रव्येण स्वकारणमतीत्य रोहति, 'अन्नाद्भूतानि जायन्ते' इति श्रुति। अहरहरशितेनान्नेन पूर्वपूर्वबाल्यकौमाराद्यवस्था अतीत्य यत् जीवजात **रोहति** वर्धते, तस्य

एतावानस्य महिमा अतो ज्यायाँश्च पूरुषः ।

मोक्षप्रदाने विष्णुरीशानो भवतीत्यर्थ । **मोक्षधर्मे,** 'अत्राज्जातस्य सर्वस्य मनुष्यादेरकारणात् । निर्वाणदायी भवति कृपया पुरुषोत्तम ' इति । (२)

उक्तं सर्वेश्वर [महिमान] मुपसहरति **एतावानस्य महिमा ।** एतत्परिमाणम...... णोस्य **महिमा** विभूतिमात्रम् । **अतो ज्यायांश्च पूरुषः।** अतः ईदृशात् महिम्न **ज्यायान्** प्रशस्य [स्यतर ?] श्रेष्ठ । यत एव पुरुष सकलानपि लोकान् व्याप्य तिष्ठति। यतश्च समस्तवस्तुजातमसौ सृजति, यतश्च ससारिणो मोक्षस्यायमीष्टे, अत एतावानस्य महिमा ।

शतपथब्राह्मणे अध्यात्मखण्डे प्रतिपादितम् —"यदाऽय **नारायणाख्य** पुरुषो महान् भवति, तदानीमेवाणुर्भवति । यदाऽय व्याप्तो भवति, तदैव प्रादेशिको भवति । यदैव भूमौ भवति, तदैव परमव्योम्नि भवति । यदा एक एव भवति, तदा अनेक । यदाऽय प्राकृतो भवति, तदैवाप्राकृतो भवति । यदा विषयवशो भवति, तदैवोपरतो भवति । यदा नरको भवति, तदानीमेव स्वर्गो भवति । यदा स्त्री भवति, तदैव पुरुषो भवति । यदा मनुष्यो भवति, तदा देवो भवति । यदा सर्व भवति, तदा शून्यो भवति । यदा प्रपञ्चो भवति, तदा प्रपञ्चाद्भिन्नो भवति । यदा बद्धो भवति, तदैव मुक्तो भवति । यदा शुक्लो भवति, तदा कृष्णो भवति । यदा शरीरी भवति, तदा अशरीरी भवति। यस्मात् यानि यानि विरुद्धस्वभावानि, तानि सर्वाणि तदानीमेवास्मिन् लीनानि भवन्ति, तस्मदयमीश इति दुर्ज्ञान , दुर्वच , दुर्ध्यान । तस्मात् ज्येष्ठ । वाङ्मनसोरगोचर " इति ।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥ ३ ॥

हरिवंशे पुरुषसूक्तप्रकरणे नारदस्तुतौ, 'देशतः कालतो वाऽपि मोक्षदत्वाच्च (?) वेधसः । हरेर्विभूतिमात्रं तु केवलं प्रतिभावितम् ॥ अतो महिम्नः स्वरूपांशात् ज्यायानेव परः पुमान् । ज्यायस्त्वं तस्य तत् सर्वं सुदुर्ज्ञानतरं भवेदिति ॥ ब्राह्मणेभ्योऽखिलेभ्यश्च भूतजातेभ्य एव च । ब्रह्मादिभूतसर्वेभ्यो ज्यायानेव परः पुमान् ॥ ओजसो रूपतो वापि यशसो वीर्यतोऽपि च । विभुत्वातिशयाद्वापि ज्यायानेव जनार्दनः ॥ इति ।

महाभारते— 'एकतो वा जगत् कृत्स्नमेकतो वा जनार्दनः ।
सारतो जगतः कृत्स्नादतिरिक्तो जनार्दनः ॥' इति ।

श्रीभगवद्गीतायाम् — "द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ॥" इति ।

श्रीनारसिंहे— "ब्रह्मादिस्तम्बपर्यन्तं जगत् स्थावरजङ्गमम् ।
सर्वमेवास्य महिमा स च ज्यायानतो हरिः ॥" इति ।

[1]अथवा—अस्य परिदृश्यमानस्य चराचरात्मकस्य प्रपञ्चस्य महिमा एतावान् परिच्छिन्नः । अतः अस्मात् प्रपञ्चात् पुरुषो ज्यायान् अपरिच्छिन्नप्रभावः ।

अस्य ज्यायस्त्वमेव प्रपञ्चयति **पादोऽस्य विश्वा भूतानि** । अस्य दुर्ज्ञानस्य पुरुषस्य **विश्वा भूतानि** चराचरात्मकानि **पादः** अंशः

1 अस्येति मौलं पदं परमात्मपरतया व्याख्यातम्, प्रपञ्चपरतया व्याख्याति अथवेति ।

कलामात्रमित्यर्थ । सृष्ट्यादिशक्तेरेकदेश । तदीयशक्तिलेशविजृम्भित मिद जगद् गीयते,-'विष्टभ्याहमिद कृत्स्नमेकांशेन स्थितो जगत्' इति । श्रीविष्णुपुराणे— यस्यायुतायुतांशे विश्वशक्तिरिय स्थिता' इति । अत्रैव गोपीनां वचने— 'यस्याखिल महीव्योमजलाग्निपवनात्मकम्।

ब्रह्माण्डमल्पकांशांशे तोऽयामस्त्वा कथ वयम् ।।" इति ।

श्रीनारसिंहे— 'यदंशांशतदंशांशतल्लेशल्वलेशत ।

उत्पन्नश्च प्रलीनश्च जगत् सर्वं चराचरम् ।।' इति ।

त्रिपादस्यामृत दिवि । त्रय पादा यस्य, तत् त्रिपा दुक्तम् । त्रिशब्दो बह्वर्थपर । अस्य निरतिशयज्ञानानन्दवैराग्यैश्वर्यादिभि रनेकै सुगुणैरुपेतस्य रूपममृत दिवि । अमृतम् अमरणधर्मकमित्यर्थ । दिवि परमे स्थाने । यत् परमपदवाच्य सूरय सदा पश्यन्ति । "द्युशब्द परमे व्योम्नि स्वर्गे वियति कथ्यते ।" इति

वैकुण्ठसंहितायाम् —"अनन्तायामविस्तारो वैकुण्ठ समकीर्तित ।

तस्मादस्य त्रिपादांशो वैकुण्ठो भासतेतराम् ।।" इति ।

एव सात्त्वतसंहितायां वासुदेवस्य चतुर्व्यूहाध्याये, 'अत्र पाद शब्द चतुर्थांश (बवचन ?)। त्रिपाच्छब्द त्रिपादवचन'।

पुरुषसंहितायां वैकुण्ठसंहितायाश्च,—

'सदादिपुरुषो विष्णु सर्वव्यापी सनातन ।
शरीरात् स्वाज्जगत् स्रष्टु सङ्कर्षणमभावयत् ।।
स च प्रद्युम्नसंज्ञस्सन् अनिरुद्धमभावयत ।
तस्मात् ब्रह्मा समुत्पन्नो जगत् स्रष्टु चराचरम् ।।

त्रिपादूर्ध्वं उदैत् पुरुष पादोऽस्येहाभवात् पुनः।

एवं चतुर्धा सन्यूह्य स्वात्मानं पुरुषोत्तम ।
अण्डे ह्यप्राकृते नित्यं त्रिपादेन विराजते ॥
इतरेण च पादेन प्राकृतेऽण्डे विराजते ।
जगत्सृष्ट्यादिकार्याणि कर्तुकाम स्वलीलया ॥' इति । (३)

उक्तमेवार्थान्तरविवक्षयाऽनुवदति-त्रिपादूर्ध्वं उदैत्। उदैत् = उद्गतवान्। यद्वा स एष त्रिपादिति त्रिपाद पुरुष उर्ध्वं प्रकृतिमण्डलादूर्ध्वम् उदैत् उदगच्छत् ।

त दुर्ज्ञान पुरुषं विहाय तस्य चतुर्थांशमनिरुद्धाख्य नारायणमदूरविप्रकर्षेण स्तोतुमारभन्ते । पादोऽस्येहाभवात् पुनः । अस्य पाद। एकदेश इह अभवत् पुनः ससारचक्रे भोग्यभोगायतनादिरूपेण पुनरभवत् =पुन पुन प्रवर्तते। अभवादित्याध्वर्यवपाठे दीर्घ छान्दस।

यद्वा भगवद्व्यूहाभिप्राय पादोस्य विश्वा भूतानीत्यादि । वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाकारो भगवाश्चतुर्व्यूहो भवति। अत्र भगवत स्तुरीयो भाग अनिरुद्धाभिधान विश्वानि भूतान्यधिष्ठाय सृष्ट्यादीनि करोति। पूर्ववत् कार्यकारणयोरभेदवाद । इतरैस्त्रिभिर्भागैर्वासुदेवसङ्कर्षणप्रद्युम्नाख्यैरपेनममृतमविनाशि परमसुखरूप दिवि नाकपृष्ठे वसति। उक्तमेव व्यनक्ति त्रिपादिति। वासुदेवादिरूपैस्त्रिपात् पुरुष ऊर्ध्वः वाङ्मनसयोरगोचरस्सन उदैत् प्रकृतिप्राकृतमयात् सुदूरमुत्क्रान्तवान् । इह ससारमण्डले अस्य पाद। अनिरुद्धाभिधान भगवानभवत् । पुन पुन सृष्ट्यादौ प्रवर्तत इति । तथा च पुराणे तत्त्वाध्याये—

ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥ ४ ॥

"सर्वस्याथ जगन्नाथ, सर्वात्मा भूतभावन ।
महतः प्रळयस्यान्ते जगत् स्रष्टुं समुद्यत ॥
परमव्योमनिलयो वासुदेव सनातन ।
शरीरात् स्वाज्जगत् त्रातुं सङ्कर्षणमभावयत् ॥
स चाण्डजातमसृजन् महाभूतानि पञ्च च ।
दशोत्तराणि सर्वाणि परस्तात् प्रकृतेर्व्यधात् ॥
तत्तत्स्थानाञ्च भूतानामन्योन्यानुभवाय च ।
प्रद्युम्न भावयामास सदा कामरसप्रदम् ॥
एवमप्राकृतान्येव बाह्यान्यण्डानि केशव ।
सृष्ट्वा प्राकृतं चाण्डं स्रष्टुं दध्रे समानसम् ॥
ततः स वासुदेवोऽयं प्रद्युम्नादुदपादयत ।
सर्वस्य जगत. कोशमनिरुद्धाह्वयं हरिम् ॥
स चानिरुद्धो भगवानादौ जलमभावयत् ।
जले तस्मिन् प्रचिक्षेप निजवीर्यं जगन्मयम् ॥
तद् द्वितीयाण्डमभवत् अण्डात् ब्रह्मा व्यजायत ।
स भूताना च सर्वेषामग्रे जातः पितामह ॥
जगन्निर्माणुमुद्युक्तः समन्ताद्विक्रमे...... ।
ततः संवर्द्धयमानोऽयं सृष्टियत्नात्मना व्यधात् ॥" इत्यादि ।

संप्रति विवक्षितां प्रपञ्चसृष्टिं वक्तुमुपक्रमते ततो विष्वङ् व्यक्रामदिति । समन्तादर्थे विष्वङ् निपातः । ततः पश्चात् पुरुषः

तस्माद् विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः ॥ ५ ॥

ततः महत्फलवशात् पश्चात् तेन पादनारायणेन व्यक्रामत् उद्यममकरोत् । किमुद्दिश्य । साशनानशने अभि । अशनेन सह वर्तत इति साशनं जङ्गमवस्तु । अशनमस्य नास्तीत्यनशनं स्थावरं वस्तु । ते उभे प्रति, विष्वक् सर्वतः चराचरात्मकं समस्तं जगत् प्रति मानससंङ्कल्परूपं सृष्टिव्यापारमकरोदित्यर्थः । (४)

तस्मात् विराडजायत । तस्मादेवं व्यापारवतः पुरुषात् विराड जायत । विराट्च्छब्देन महदादिरूपेण विविधं राजतीति हिरण्मयमण्डमुच्यते । विराजो अधि पूरुषः । विराजोऽनन्तरं पुरुषश्चतुर्मुखाख्योऽप्यजायत । तथाऽऽह मनुः —

'ततः स्वयंभूर्भगवानव्यक्तो व्यञ्जयन्निदम् ।
मयामूतादिवृत्तौजाः प्रादुरासीत् तमोनुदः ॥
सोऽभिध्याय शरीरात् स्वात् सिसृक्षुर्विविधाः प्रजाः ।
अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥
तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् ।
तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥' इति ।

स जातो अत्यरिच्यत । तस्मात् ब्रह्मा अतिरिक्तोऽभवत् । पश्चाद् भूमिमथो पुरः । अथो शब्द....र्थः । विभक्तिव्यत्ययेन भूमेः पश्चात् पुरस्ताच्चोर्ध्वं चात्यन्तं प्रवृद्धो व्याप्तो बभूवेत्यर्थः । सर्वत्रातिवृद्धकायोऽभवत् ।

शाम्भव्यपुराणे — पुरुषसूक्तसहितायाः— 'आदिश्चतसृणा...
दित्यादि । स तस्मात् व्यापारान्तरम । अथ पादनाराय
णात् मूल प्रकृतिरजायत । सा प्रकृति पादनारायणशासनात् महद
हङ्कारादीन् पदार्थानजनयत् । एव सूक्ष्मायां सृष्टौ, कृपया स पाद
नारायण स्थूलसृष्ट्यर्थं चतुर्मुखमभिदध्यौ । तद्ध्यानात दनन्तरमथ
विराज पश्चात् पुरुषश्चतुर्मुखाख्य अजायत । पश्चात् पुरतश्चाति
रिच्यते । अतिरेको वृद्धि । सर्वकार्यक्षमोऽतिवृद्धकायोऽभवत् । वृद्ध
कायस्सन् तूष्णीमास्त ... अनिरुद्धनारायणोऽप्राक्षीत् । ब्रह्मन् ! किं
तूष्णीं भवसीति । अज्ञानादिति होवाच । ब्रह्मन् ! तवेन्द्रियाणि देवान्
ऋत्विज कृत्वा त्वदीय च कळेबर हवि कृत्वा मा हविर्भुज ध्यात्वा
मय्यग्नौ निवेदय । मदङ्गस्पर्शमात्रेण जगत्कोशभूत त्वत्कायो वृद्धिष्यते ।
तस्मादुद्भूतानि प्राणिजातानि यथापूर्वं निर्मान् त्वष्टा भवष्यसि । य
एव सृष्टियज्ञ जानाति, स जन्मनीह मुक्तो भवतीति ।

ईदृशस्य ब्राह्मणस्योपरि वतरति ।

श्रीवराहपुराणे— "सिसृक्षोरनिरुद्धाख्यादण्ड प्रथममुद्बभौ ।
अण्डाद्ब्रह्माऽप्यजायत निर्मातु सकल जगत् ॥
स जातमात्रो भगवानवर्धत समन्तत ।
त प्रवृद्धमहाकाय ब्रह्माण रचिताञ्जलिम् ॥
जगत्सृष्टिमजानन्तमनिरुद्धो हरिर्जगौ ।
त्वमिन्द्रियैर्देवसङ्घै कुरु यज्ञ समाहित ॥
त्वच्छरीर हविर्ध्यात्वा मा ध्यात्वा च हविर्भुजम् ।

तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यान् आरण्यान्, ग्राम्याश्च ये ॥ ९ ॥

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दाँसि जज्ञिरे तस्माद् यजुस्तस्मादजायत ॥ १० ॥

ब्रह्मणे त्वा महसे। महते ब्रह्मणे त्वाम् [समर्पयामि ?]। ओमित्यात्मानमुपहार आत्मानौ युञ्जीत। स एव जीवात्मपरमात्मयोग इति। प्रकृतमनुसरामः ॥ (८)

तस्माद् यज्ञात् सर्वहुत इति। सर्वं जुहोति [1]त्यजतीति अङ्गयागो न भवतीति गार्ग्यायणाः। सर्वहुत् पशुः[2] सर्वहुतो यज्ञाख्यात् ब्रह्मणः पृषदाज्यं संभृतमभूत्। पृषदाज्यं याज्ञिका दधिमिश्राज्यं प्रचक्षते। अत्र तु सृज्यमाणिजननहेतुभूतं वीर्यं पृषदाज्यं भवतीति प्रोच्यते। तद्यथा चित्ररूपं भवति, एवमेव पशुनी(पशोर्नी?)लादि विचित्रभूतं वस्तु जातं भूतमित्यर्थः। पशूँस्ताँश्चक्रे वायव्यान्। वायुशब्देन वायुमताऽन्तरिक्षेण गतिर्लक्ष्यते। वायव्यान् पशून् पुरुषश्चक्रे ससर्ज। आरण्यान् व्याघ्रादीन्। आरण्यशब्दः पशुविशेषणम्; ग्राम्यशब्दश्च। ग्राम्याश्च ये पशवः मार्जारादयः, वराहादयो वा, तान् चक्रे; वायव्या ये आरण्याः, तानपि चक्रे। (९)

तस्माद् यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे। ऋग्वेदः सामवेदश्च प्रादुरभूताम्। छन्दाँसि जज्ञिरे तस्मात्। गायत्र्यादीनि अजायन्त। यजुस्तस्मादजायत। यजुः यजुर्वेदश्च।

---

1 पशुयागे हृदयादिपश्वङ्गानामवदानेन यागः पृथक् भवति। तथाऽत्र न भवतीत्यर्थः। 2 पशुरिति। तथाचात्र यज्ञाद् यज्ञसाधनपरम्।

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥ ११ ॥
यत् पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य को बाहू कावूरू पादावुच्येते ॥ १२ ॥
ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः ।

तस्मादश्वा अजायन्त । यज्ञसंबन्धिन अश्वा । **ये के चोभयादतः, गावो ह जज्ञिरे तस्मात्** । अधरोत्तरभागयोरुभयोर्दन्ता येषाम्, ते रासभादय । ते च गावश्च जज्ञिरे । **तस्मात् जाता अजावयः** । अजाश्चावयश्च जज्ञिरे । क्वचित्तु विशब्दो बहुवचनान्त इति कृत्वा [अजा इति पृथक्कृत्य मृगा पक्षिणश्च जाता इति व्याकुर्वते ?] ॥

पुरुषस्य मुखाद्यव[1]यवप्रकारान् पृच्छति **यत् पुरुषं व्यदधुः** । यदा पुरुषसंज्ञ पशुत्वेन देवा व्यदधु, तदा **कतिधा व्यकल्पयन्** । किंप्रकार मुखाद्यवयव कल्पितवन्त इत्यर्थ । प्रश्नार्थं व्यनक्ति **मुखं किमस्य**— मुखात् किमिति वक्तव्ये मुखमित्यादिप्रथमानिर्देश कार्यकारणयोरभेदविवक्षया । **कावूरू पादावुच्येते** । अस्य पुरुषस्य किंप्रकार मुखम् । उत्पाद्यमानेषु ब्राह्मणादिषु वर्णेषु अस्य मुख किमासीत् । बाहू च किंप्रकारौ । कावूरू आस्ताम् । कौ च पादावुच्येते । (१२)

परिहरति **ब्राह्मणोऽस्य मुखमासीत्** । ब्राह्मणजातिरजायत । अनेन ब्राह्मणजातिकारणभावो मुखस्य प्रकार उक्त । एवमुत्तरत्रापि द्रष्टव्यम् । **बाहू राजन्यः कृतः** । बाहुभ्या क्षत्रियजातिरकारीत्यर्थ ।

ऊरू तदस्य यद् वैश्यः । यत्[2] वैश्यनामा जातिर्भवति, तदस्य

---

1 अवयवप्रकारान्—अवयवकार्यविशेषान् । अवयवगतान् कारणत्वप्रकारान् वा । 2 यत्वद विलक्षणगुणवैषम्ययुक्तसंस्थानपरम् ।

\

ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥ १३ ॥
चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद् वायुरजायत ॥ १४ ॥
नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ॥ १५ ॥

पुरुषस्य ऊरुभ्यामजायतेत्यर्थः। यत्तदो. सामान्यवचनत्वात् नपुंसकनिर्देश । मुखादीनां ब्राह्मणादिभिरभेदवादः कार्यकारणभावकृत । ब्राह्मणं प्रकृत्य मनुः — 'तं स्वयंभूः स्वकादास्यात् तपस्तप्त्वाऽऽदितोऽसृजत्' इति ।

तथा, 'लोकाना तु विवृद्ध्यर्थं मुखबाहूरुपादत. ।
ब्राह्मण क्षत्रियं वैश्य शूद्रं च निरवर्तयत् ॥' इति ।

पद्भ्यां शूद्रो अजायत :(?)सकारभावश्छान्दसः। निसर्गसिद्ध शूद्रवर्ण. ।

अथ यष्टव्याना देवताना सृष्टिमाह—चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत । चक्षुर्भ्यामिति विभक्तिव्यत्ययं करोति । मुखादिन्द्रश्चाग्निश्च। अजायेतामिति संबन्ध । प्राणाद्वायुरजायत । सिद्धोऽर्थः।

[1]अनुष्ठितयज्ञाना (?) ब्राह्मणादीनामुपभोगाय लोकानां सृष्टिमाह नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिरिति । समवर्तत इत्यनुषङ्ग । दिशः श्रोत्रात् समवर्तन्त । तथा लोकाँ अकल्पयन् । तथा, यथा अतीते कल्पे देवा(?) अकल्पयन् । 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।', 'नामरूपं च भूतानां कृत्यानां च प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार सः ॥', 'दिवं च पृथिवीं चान्तरिक्षमथो सुव ' इति ।

---

1 भाक्तनलोकस्य कर्माधीनत्वज्ञापनाय अनुष्ठितयज्ञानामिति ।

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसस्तु पारे ।
सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वाऽभिवदन् यदास्ते ॥१६॥
धाता पुरस्ताद् यमुदाजहार शक्रः प्रविद्वान् प्रदिशश्चतस्रः ।

एवं सृष्टियज्ञं समाप्य पुनरपि त्रिपादं महान्तं पुरुषं कः साक्षात् जानातीति प्रश्नमुखेन स्तोतुमारभते । ब्रह्मादिस्तम्बपर्यन्तस्य जगतः परमकारणं पुरुषं प्रतिपुरुषसूक्तसूक्तरूपं को वेति? तत्राह **वेदाहमेत-मिति** । सहस्रशीर्षेमि(र्षा इ?)त्युक्तमेतं महान्तं पुरुषमहं **वेद** जानामि । नान्यः कश्चित् **वेद** वेत्तीति वेदानामात्मनो वचनम् , अस्य सूक्तस्य ऋषेर्नारायणस्य वाक्यं वा । किंरूपम्? **आदित्यवर्णम्** । 'आदित्यवर्णं पुरुषं वासुदेवं विचिन्तयेत्' इति **मोक्षधर्मे** । क्व अवस्थितं वेत्ति?(सि?) । **तमसस्तु पारे** । **तमः**शब्देन प्रकृतिरुच्यते । प्रकृतेः परस्तात् स्थितं वेत्ति(द्मि?)। तमसः परमो धातेत्यस्ति । कियाध्यायम्? **महान् पुरुषः** । [कदा?] । **सर्वाणि रूपाणि विचित्य धीरः** । सृष्टानां चराचरात्मकानि रूपाणि **विचित्य** समुत्पाद्य, अथवा वैविध्येन च बुध्वा तेषां नामानि च कृत्वा तैः तान्यभिवदन् **धीरः** धिया रममाणः परमविद्वान् **अभिवदन्** तैस्तैर्नामभिराभिमुख्येन वदन् यदा आस्ते, तदा तं पुरुषं वेत्ति(द्मि?) । इतश्चाह वेद्मि । कोऽसावेवंविधः पुरुषः? कायमास्ते? विशदं ब्रूहि [इति?] चेत् , अहमप्यविप्रकर्षेण जानामि, न वेद्मीत्याह **धाता पुरस्ताद्यमुदा जहारेति** । पूर्वस्मिन् काले चतुर्मुखो यम् आत्मनः कारणभूतमुदा-जहार='तमब्रवीत् त्वं पूर्वं समभूः । त्वमिदं पूर्वं कुरुष्व' इत्यादिपूदा-हृतवान् । तथा **शक्रः प्रविद्वान्** प्रकृष्टज्ञानः शक्रः [विप्रहवलि वासुदेवे

अधिगतपुरुषोत्तमतत्त्वज्ञान इन्द्रो य परमकारणत्वेनोदाहृतवान् इन्द्र-प्रतर्दनसवादे, 'प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रिय धामोपजगाम' इत्यादौ श्रु तौ। तथा प्रदिशश्चतस्र.। प्रदिशश्च यमुदाहु । दिक् छब्देन दिग्वर्तिनो ज्ञानवन्त उच्यन्ते । दिगधीना पुरुषा उपलक्ष्यन्ते। तथा श्रीमद्रामायणे विश्वामित्रवचनम्,

'अह वेद्मि महात्मान राम सत्यपराक्रमम् ।
वसिष्ठोऽपि महातेजा ये चेमे तपसि स्थिता ॥' इति।

तत्रैव रावणवधानन्तर राम प्रति ब्रह्मणो वाक्यम्। यथाह—

'भवान्नारायणो देव श्रीमान् चक्रायुधो विभु । एकशृङ्गवराहस्त्व भूतभव्यसपत्नजित्। अक्षर ब्रह्म पार त्व मध्ये चान्ते च राघव ॥

लोकाना त्व परो धर्मो विष्वक्सेनश्चतुर्भुज ।
शार्ङ्गधन्वा हृषीकेश पुरुष पुरुषोत्तम ॥' इति।

अत्रैव लक्ष्मण प्रति दशरथवाक्यम्, यथा —

'एतत्तदुक्तम यक्तमक्षर ब्रह्म निर्मितम् ।
वेदाना हृदय सौम्य गुह्य राम परतप ॥' इति।

अत्रैव मन्दोदरीवाक्यम्, यथा—

'व्यक्तमेष महायोगी परमात्मा सनातन । अनादिमध्यनिधनो महत परमो महान् ॥ तमस परमो धाता शङ्खचक्रगदाधर । श्रीवत्स वक्षा नित्यश्रीरजय्य शाश्वतो ध्रुव ॥' इति। वेदोऽपि स्वकण्ठेन महान्त पुरुष वक्तुमशक्नुवन् तदीयानि चिह्नानि आहेत्यवगन्तव्यम् ।

तमेव विद्वान् अमृत इह भवति नान्य पन्था अयनाय विद्यते॥१७
यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्।
ते ह नाक महिमान सचन्ते यत्र पूर्व साध्या सन्ति देवा ॥

इति याजुष पुरुषसूक्त पूर्णम् । ॥ श्रीरस्तु ॥

तमेव विद्वानमृत इह भवति । श्रुतिवदति । त परम पुरुष एव जगतामादिकारण विद्वान् जानन् अमृत इह भवति इहैव जन्मनि अमृतो भवति । ससारबन्धान्मुक्तो भवति । नान्यः पन्था अयनाय विद्यते । अयनाय मोक्षाय एवविधपुरुषज्ञानादन्य पन्था न विद्यते । 'अयन निलये मार्गे मुक्तौ चापि प्रकथ्यते' इति निघण्टु । इद पुरुषसूक्तप्रतिपाद्यपुरुषज्ञान मोक्षोपाय इति ।

उपक्रान्त सृष्टियज्ञमुपसहरति यज्ञेन यज्ञमयजन्त देवाः । यज्ञसाधनभूतचतुर्मुखाख्यपशुहविषा यज्ञमयजन्त सृष्टियज्ञमकुर्वत—[1]धातुरनुवाद । देवा साध्या देवा तदिन्द्रियाणि वा । तानि धर्माणि प्रथमान्यासन् । (?) सृष्टियज्ञनामिदेवाना सर्वविषया व्यवहारा धर्माणि प्रथमानि मुख्यानि लोकश्रेयस्साधनान्यासन् । मोक्षहेतुतया प्रधानभूता इत्यर्थ । ते ह नाक महिमानः सचन्ते । मह पूजायाम् । मनिन्प्रत्यय । पूजय त = भगवन्त नारायणमर्चयन्त नाक सचन्ते । कमिति सुखनाम । अक=दु ख । तत् यत्र नास्ति, तन्नाक परमव्योम प्राप्नुवन्त । भगवच्चोदितो ब्रह्मा लोकसृष्टि तदाराधन बुद्ध्याऽनुष्ठि(ष्ठाय त ?)तो वैकुण्ठाख्य पर पद प्राप्तवान् । अमन्यन्त

---

1 अयजन्तेत्यत्र धातु पाक पचतीत्येव द्वितीयान्तोक्तानुवादमात्रमित्यर्थ ।

प्रासवन्त: । बह्वचपाठे अडागमाभावश्छान्दस: । तैत्तिरीयपाठे भूतार्थे । 'नाकोऽम्बरेऽपि च स्वर्गे परमव्योम्नि च स्थित:' इति । 'एको विष्णुर्जगत्स्वामी वासुदेव: सनातन:' इति श्रीवाराहेऽप्यस्ति । **यत्र पूर्वे साध्याः सन्ति देवाः** । यत्र नाके पूर्वे पूर्वस्मिन् **साध्या** नाम **देवाः** सूरयो वर्तन्ते ।

(?) पतिमिति......देवमेवैतत्सूक्तं व्याचक्रिरे । **तस्मात् विराड जायत** । विराडाख्य: प्रजापतिरजायत । **विराजो अधि पुरुषः** । वैराजो मनुर्नाम पुरुष । **यत् पुरुषेण हविषा देवाः** । **देवाः** मन्वादय: जगत्सिसृक्षव । **तेन देवा अयजन्त**—साध्यानामृषीणां देवानाञ्च पुराकल्पे ध्यानमययज्ञानुष्ठानानुकीर्तनम् । तस्माद्यज्ञादिति ध्यानमयात् यज्ञात् जगदुत्पत्तिवाद: । **यत् पुरुषं व्यदधुः** । पुरुषं परमपुरुषं यं सहस्रशीर्षत्वादिविशेषणविशिष्टं जगन्मूलकारणत्वे व्यदधु:, तं **कतिधा व्यकल्पयन्** कियत्प्रकारं व्यकल्पयन्त देवा: । प्रश्नविवरणमुत्तरञ्च पूर्ववत् । **तथा लोकाँ अकल्पयन्** । ब्राह्मणादीनां भूम्यादीनां लोकानाञ्च परमपुरुषमुखाद्यवयवेभ्य: सृष्टिर्यथा कथिता, तथा **देवा अकल्पयन्** निश्चितवन्त: । एवं सृष्टान् लोकान् व्यनक्ति......
यज्ञेन यज्ञमयजन्त ध्यानमयेन जीवात्मयज्ञेन यज्ञात्मान नारायणमययजन्त देवा: । **तानि धर्माणि प्रथमान्यासन्** । एवं कृता: ध्यानमययज्ञा: मोक्षहेतुतया मुख्या धर्मा आसन् । तेन देवा आ (?) याजिनो....नाक वैकुण्ठाख्य प्रासवन्त इति ।

एतद्ब्रह्मयज्ञं(?) तद्व्याख्यातृभिर्व्याख्यातं श्रुतिस्मृतीतिहासपुराणै: नारा-

यणादण्डोत्पत्तिमण्डाद्ब्रह्मोत्पत्तिं प्रतिपादयद्भिः [1]अनादृतमित्यनादरणीयम्।
अतोऽयमेव व्याख्यानप्रकारः प्रशस्यत इति।

---

1 अनूदिते व्याख्याने परमात्मविग्रहादेव वर्णाद्युत्पत्तिरुक्ता।

अत इति। सर्ववेदनिविष्टे सर्ववेदाध्ययनफलप्रदे सर्वसारभूते नित्यब्रह्मयज्ञोपयुक्ते पुरुषसूक्तेऽस्मिन् आदरमतिशयितं वहन्तो महान्तो विविधं व्याख्यायोपबृंहणमकुर्वन्। एवं मुद्गलोपनिषदादयः श्रुतयः श्रीपञ्चरात्रग्रन्थाश्च तदर्थविशदीकरणैकपरा इति चैतावता विदितमेव। अत एतदर्थवर्णनप्रणालिकाः विभिन्नाः प्राप्ताः। सर्वथा श्रीमतो नारायणस्य भगवतः पुरुषोत्तमस्य पारम्यमत्र प्रस्फुटमावेद्यत इत्यत्र सर्वेषामेकवाक्यतैव। तत्तदभिमतयोजनाभेदपर्यालोचनया वाक्यानामर्थभेदस्य व्यक्तत्वेऽपि तद्योजनादर्शिनः सर्वोऽप्यर्थः सर्वैरबाध्यत्वेन संमन्तुमर्ह एव। तत्र प्रमेयाणामनेकत्वात् वाक्यानामल्पसंख्यत्वात् तेषां सर्वेषामत्र वाक्येषु निवेशप्रदर्शनस्यावश्यकत्वात्, सकृत्प्रयुक्तस्य वाक्यस्यानेकार्थकल्पना न युक्तेत्याशयाच्च स्वस्वाभिमतमेकैकमर्थं केचित् प्राचीकशन्। अन्ये पुनरेकतमनिष्कर्षे उदासीनाः बहूनप्यर्थान् एकैकस्मिन् वाक्ये, एवं वा, एवं वेति विकल्प्य समघटयन्। यथा—

प्रकृतौ परिभ्रमतां जीवानामनन्तत्वात् एवं शीर्षादिकमादायैव सहस्रशीर्षत्वादिकं भगवतः केचिददर्शयन्। सर्वशरीरिणस्तस्य न तत्र घटते। स्वयमेव शीर्षसहस्रादिशालि रूपं दिव्यं बिभर्तीत्यन्ये। तदपि भगवद्गीतादिप्रामाण्यात् विश्वरूपदर्शिनो भगवतः सत्यं स्थितमेव। शीर्षाद्यभावेऽपि शीर्षादिकार्यकरणशक्तत्वात् सहस्रशीर्षत्वादिव्यपदेश इति परे। तदपि, 'अपाणिपादो जवन.' इत्यादिश्रुतिबलात् स्वीकर्तव्यमेव। अन्यथा अप्राकृतरूपाश्रयरहितस्थले कार्यानिष्पत्तेः। एवं दशाङ्गुलपदेऽपि सामान्यतः आनन्त्यं विवक्षन्ति

केचित्। दशगुणवस्तुव्यापनं दशविधवस्तुव्यापनमेव वा भगवति निरूपयन्त्यन्ये। 'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इत्यत्र चातुर्व्यूहविवक्षां विनेयार्थं वर्णयन्ति केचित्। अन्ये तद्विवक्षयेव। 'विराडजायत, विराजो अधिपूरुषः' इत्यत्र क्रमेण प्रकृतिर्जीवाविर्भाव-वर्णनं केषाञ्चिदभिमतम्। अनिरुद्धचतुर्मुखयोराविर्भावमन्ये आहुः। ब्रह्मणो मनोश्चोद्भवं परे। सर्वमिदं प्रमाणान्तरप्रमितमेव।

अथ यो यज्ञः प्रस्तुतः, 'यत् पुरुषेण हविषा देवा यज्ञमतन्वत' इत्यादिना, किमसौ वास्तवहोमसंवलित एव, उत ध्यानमय इति परामर्शे, मुखादिन्द्रश्चाग्निश्चेति अग्नेरपि अन्याविशेषमत्र एवोत्पाद-नीयतया ध्यानमय एवायं युक्त इति प्रन्वेव प्रायो ध्यानपक्षमेव परि-गृह्णन्ति। वाह्ययागापेक्षया हार्दयागस्य विशेषतो भगवत्समाराधनत्वं व्यक्तमन्यत्र। पुरुषरूपश्च हविः चतुर्मुखशरीरम्। ध्यानस्य ध्यातृ-समवेतेन्द्रियसाध्यत्वात् देवशब्द इन्द्रियपर इति केचित्। नित्यसूरी-णामपि अभिमानितया नियन्तृतया श्रीविष्णुपुराणादिप्रतिपन्नत्वात् नित्यसूरिविशेषा एव साध्या देवा इत्यन्ये। परिधयः समिधश्च विशिष्यानिर्दिष्टाः यथाव्याख्यं विमृश्य निधार्याः। वेदान्तपुष्पाञ्जलाव-स्माभिरित्थमुक्तम्-"चत्वार्यक्षाणि चान्तर्दश च महदहङ्कारभूतानि देहस्थानि त्रिसप्त मन्ये वहिरपि महदादीनि लक्ष्मीश सप्त" इति।

एवं तावत् तत्तद्ग्रन्थोक्तं सर्वमपि परामृश्य, संकलय्य समा-दरणीयमेव भवेदिति नात्रैकस्मिन् पक्षे अभिनिविश्य पक्षान्तरस्य असमाराधनीयमिति विभावनमुचितं लक्ष्यते। एवं स्थिते यदिदं किञ्चिदिह प्रस्तुतमस्ति प्रकृतभाष्ये, किं सर्वमिदं तत्तदवयवविशेषेभ्य उत्पन्नतयेह वर्णितं चतुर्मुखशरीरान्तर्गततया वर्ण्यमानं संगन्तव्यम्, उत परमपुरुषविग्रहादेवेति विचारे द्वितीयः पक्षो न ग्राह्य इति। अत्र किञ्चिद् वक्तव्यं लक्ष्यते—तत्रतत्र पक्षान्तराणामसत्त्वाभाववत् अन्यत्राप्यसत्त्वाभावः संमन्यताम्। अतः साऽपि योजना कामं भातीति।

कल्पादौ चतुर्मुखशरीरात् विविधा चैतन्यसृष्टिर्भवतीति श्रीविष्णुपुराणे (१. ५.) प्रतिपादितमिति तत्र न संदेहः । तथा हि तत्र देवादिसृष्टिमुपवर्ण्य, 'एतानि सृष्ट्वा भगवान् ब्रह्मा तच्छक्तिचोदितः' इति तिर्यक्स्थावरसृष्टिं प्रस्तुत्य, तत्र कृतयुगस्य ध्यानप्रधानत्वेऽपि त्रेतायुगस्य यज्ञप्रधानत्वात् तदा ग्राम्यारण्यविभागोऽपि पशूनां तेन कृत इति कथयित्वा, 'गौरजः पुरुषो मेषश्चाश्वाश्वतरगर्दभाः । एतान् ग्राम्यान् पशूनाहुः आरण्यांश्च निबोध मे । श्वापदा द्विखुरा हस्तिवानराः पक्षिपञ्चमाः । औदकाः पशवः षष्ठाः सप्तमाश्च सरीसृपाः' इति ग्राम्यान् अन्यांश्च पृथक् परिगणय्य, तस्यैव चतुर्भ्यो मुखेभ्यः ऋगादिचतुर्विधवेदादिसृष्टिमभिधाय, 'नाम रूपञ्च भूतानां देवादीनां चकार सः' इत्यादिनोपसंहृतम् । एवमपि तत्रैव, १-१२. ध्रुवस्तोत्रे पुरुषसूक्तार्थविवरणे परमपुरुषविग्रहादेव सर्वेषामुत्पत्तिरभिहितेति स्वरसतः प्रतीयते । तथा हि शंखप्रान्तेन स्पृष्टवन्तं पुरि प्रत्यक्षमागतं गोविन्दं ध्रुव एवं स्तौति—

'बृहत्त्वाद् बृंहणत्वाच्च यद्रूपं ब्रह्मसंज्ञितम् ।
तस्मै नमस्ते सर्वात्मन् योगिचिन्त्याविकारवत् ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सर्वव्यापी भुवः स्पर्शात् अत्यतिष्ठद् दशाङ्गुलम् ।
यद्भूतं यच्च वै भव्यं पुरुषोत्तम तद् भवान् ।
त्वत्तो विराट् स्वराट् सम्राट् त्वत्तश्चाप्यधिपूरुषः ।
अत्यरिच्यत सोऽधश्च तिर्यक्चोर्ध्वं च वै भुवः ।
त्वत्तो विश्वमिदं जातं त्वत्तो भूतभविष्यती ।
त्वद्रूपधारिणश्चान्तः सर्वभूतमिदं जगत् ।'

'त्वत्तो ऋचः—', 'त्वत्तोऽश्वाश्च—', 'त्वन्मुखाद् ब्राह्मणाः—', 'अक्ष्णोः सूर्योऽनिलः प्राणात्', 'त्वत्तः सर्वमभूदिदम्' इति । अत्र साक्षात् गोविन्दः सर्वत्र युष्मच्छब्दैरभिधीयते । अधिपूरुष इत्युक्तः

श्रीशास्त्रपुरुषसंहितायाम् —, (मुद्गलोपनिषदि)

"सहस्रशीर्षा इत्यत्र सहस्रोऽनन्तवाचकः ।
अनन्तयोजन प्राह दशाङ्गुळवचस्त्विदम् ॥
अत्र प्रथमया विष्णोर्देशतो व्याप्तिरुच्यते ।
द्वितीययाऽस्य विष्णोः कालतो व्याप्तिरीरिता ॥
विष्णोर्मोक्षप्रदातृत्वकथनं च तृतीयया ।
एतावानिति मन्त्रेण वैभव कथितं हरेः ॥
एतेनैव च मन्त्रेण चतुर्व्यूहोऽपि भाषितः ।
त्रिपादित्यनया प्रोक्तमनिरुद्धस्य वैभवम् ॥
तस्माद्विराडित्यनया पादनारायणाद्धरेः ।
प्रकृतेः पुरुषस्यापि समुत्पत्तिः प्रदर्शिता ॥

अधिकारिपुरुषः चतुर्मुखस्तु परोक्षतो निर्दिश्यते । तत्कार्यकथनावसरे च 'अत्यरिच्यत सोऽधस्तात्' इत्येवम् । त्वद्रूपधारिण इत्यर्धस्य च, 'तस्य चतुर्मुखस्यापि जगदिदमन्तश्चेत्, किंपुनस्तवेति भावः' इति श्रीविष्णुचित्तीये विवरणं कृतम् । तथा च त्वद्रूपधारिणस्तस्याङ्गेभ्य इत्यनुक्त्वा त्वत्त इत्येव सर्वत्र निर्देशः सर्वस्य परमपुरुषजन्यत्वं दर्शयति । अवान्तरसर्गेषु चतुर्मुखकर्तृकसर्गसृष्टिसद्भावेऽपि आदिसृष्टौ भगवानेव सर्वं सृजतीति नामसहस्रभाष्येऽप्युक्तम् । श्रीदेशिकचरणाभिमतश्चेदमित्यादिकमिह वक्तव्यं सुबालोपनिषत्परिष्कारे अस्माभिरुक्तम्; यत्र मूलश्रुतिः चतुर्मुखकर्तृकसृष्टिपरेव भगवत्कर्तृकसृष्टिपराऽपि लक्ष्यत इति भङ्ग्या व्यज्ञापयाम । वेदान्तपुष्पाञ्जलावप्यस्मदीये इदं द्रष्टव्यम् । अतोऽन्यादृशव्याख्यानमपि उपादेयमेव भवेदिति ।

यत्पुरुषेणेत्यनया सृष्टियज्ञः समीरितः ।
सप्तै परिधयश्चापि समिधश्च समीरिता ॥
तं यज्ञमिति मन्त्रेण सृष्टियज्ञः समीरित ।
अनेनैव च मन्त्रेण मोक्षश्च समुदीरित ॥
तस्मादिति च मन्त्रेण जगत्सृष्टि समीरिता ।
वेदाहमिति मन्त्राभ्या वैभवं कथित हरे ॥
यज्ञेनेत्युपसंहारः सृष्टेर्मोक्षस्य चेरित ।
य एवं तु विजानाति स हि मुक्तो भवेत् ॥" इति ।

तथा मुद्गलोपनिषदि पुरुषसूक्तस्य वैभव विस्तरेण प्रतिपादितम्। सेयमुपनिषदुच्यते—वामदेव आङ्गिरस स्वपूर्वप्रज्ञासमन्वारब्ध अत्रिपत्न्या अनसूयाया गर्भ एव शयानो ब्रह्म वेदयाचक्रे । स हि गर्भे पुरो हित्वा ब्रह्मलोकमुपचकाम । मध्ये ध्यानमुपनिषदुवाच । भगवांस्तु गर्भपञ्जरमेवाभिनिविशमानो विज्ञानतन्त्र आनासि तोषाय (?) । अकस्मात्किञ्चिद्विगतासंगस्सर्वैः वन्द्यमानोऽध्वन पारमुपगच्छसि । तदेतदिदाश्चर्यम्, यद् बालस्य गुरुमनुपेयुपोऽधिगन्तुश्च भगवतोऽकस्मात् विशब्दो ब्रह्मप्रत्यय, विपरीतस्य विपरीतम् । सोऽहं भगव उप त्वा सेदिवाश्चास्मीत्यादिभिश्चतुर्भि खण्डैरिन्द्राय भगवान् ज्ञानमुपदिशन् पुनरपि सूक्ष्मश्रवणाय प्रणतायेन्द्राय परमरहस्यभूत पुरुषसूक्तार्थं द्वाभ्यां खण्डाभ्यामुपादिशत् । तौ [द्वौ] खण्डावुच्येते—

योऽयमुक्त, स पुरुषो नामरूपज्ञानागोचर ससारिणामतिदुर्ज्ञानेय विहाय क्लेशादिसंयुतान् देवादीनुज्जिहीर्षुतया सहस्रकलावयवकल्याणं

दृष्टिमात्रेण मोक्षदं वेषमाददे। तेन वेषेण (रूपेण) मृत्यादिलोकजानं व्याख्यानन्तयोजनमत्यतिष्ठत्। स पुरुषो नारायणो भूतं भव्यं भविष्यच्चासीत्। स एव सर्वेषां मोक्षदश्चासीत्। स च सर्वस्मात् महिम्नो ज्यायानासीत्। स च ज्यायान् महापुरुष आत्मानं चतुर्धा कृत्वा त्रिपादेन परमव्योम्नि भासते; इतरेण चतुर्थेनानिरुद्धेन नारायणाख्येन विश्वान्यासन्। स च पादनारायणो जगत् स्रष्टुं प्रकृतिमजनयत्। सा च प्रकृतिः ब्रह्माण्डभूता, यत्र स ब्रह्माणमजनयत्। स समृद्धकायस्सन् सृष्टिकर्म न जज्ञिवान्। सोऽनिरुद्धनारायणस्तस्मै सृष्टिमुपादिशत्, 'ब्रह्मन्! तवेन्द्रियाणि याजकानि ध्यात्वा जगत्कोशभूतं दृढमन्थिकलेवरं हविर्ध्यात्वा मां हविर्भुजं ध्यात्वा वसन्तमाज्यं ध्यात्वा ग्रीष्ममिध्मं ध्यात्वा शरदृतुं पुरोडाशं ध्यात्वा पृथिव्यप्तेजोवाय्वाकाशाहङ्कारबुद्धिं परिधिं ध्यात्वा पञ्च भूतानि तन्मात्राणि ज्ञानकर्मेन्द्रियाणि अन्तःकरणं चैकविंशतिं समिधं मय्येवाग्नौ त्वा योजय। मदङ्गस्पर्शनात् त्वत्कलेवरं बृंहिष्यति। ततः त्वत्कायात् सूक्ष्मसृष्टिहेतुभूतं पृषदाज्यं भविष्यति। सर्वाणि (?) निबिडा पश्वाद्याः प्रादुर्भविष्यन्ति। ततश्चराचरं जगद्भविष्यति। एतेन जीवात्मनो योगेन मोक्षप्रकारोऽपि कथ्यत इत्यनुसन्धेयम् — इति प्रथमः।

य इमं सृष्टियज्ञं जानाति मोक्षप्रकारञ्च, सर्वमायुरेति; अरोगश्च भवति; श्रीमांश्च भवति; पुत्रपौत्रादिसमृद्धो भवति। विद्वांश्च भवति। महापातकात् पूतो भवति। सर्वगमनात् पूतो भवति। कामक्रोधादिभिरबाधो भवति। सर्वेभ्यः पापेभ्यः पूतो भवति। इहैव जन्मनि पुरुषो

भवति । तमेवं पुरुषसूक्तार्थमतिरहस्यं राजगुह्यं देवगुह्यं गुह्यादपि गुह्यतरं नादीक्षितायोपदिशेत् ; नानियवादिने ; नायज्ञशीलाय ; नासंवत्सरवासिने ; नासंतुष्टाय ; नानधीतवेदाय । गुरुरप्येवम्भूतः शुचौ देशे पुण्ये नक्षत्रे प्राणान् आयम्य पुरुषं ध्यायन् उपसन्नाय शिष्याय दक्षिणे कर्णे सकृत् पुरुषसूक्तार्थमुपदिशेत् । न बहुशो वदेत् । यातयामं भवतीत्य.... तूर्णमुपदिशेत् । एवं कुर्वाणोऽध्येताऽध्यापकश्च इह जन्मनि पुरुषो भवति— इति द्वितीयः खण्ड ॥

इति पुरुषसूक्तभाष्यं सपूर्णम् ॥

[एतदनन्तरम्—"* सहस....ईरिता । पूर्वस्मिन्ननुवाके मुमुक्षूपास्यं परं ब्रह्म अकारवाच्यः स एव परमेश्वर इति सादरमुक्तम् । अस्मिन् प्रसङ्गे सकलवेदान्तेषु कारणत्वेन नारायणानुवाके ...क्रियते । 'लिङ्गभूयस्त्वात्' इत्यस्मिन्नधिकरणे भगवान् भाष्यकारो रामानुजमिश्रो बहुभिर्न्यायकलापैरेवमुदीरितवान्" इत्यन्य मातृकाकोशेऽस्ति । अतोऽपि पुरुषसूक्तभाष्यं किञ्चिन्महाग्रन्थमध्यनिविष्टमिति ज्ञायते ।]

इत्थं पौरुषसूक्तभाष्यमुपलभ्यामुष्य, कोशाद्विधा-
भावात् सत्यपि रङ्गलक्ष्मणमुनेस्तत्कर्तृतासंशये ।
ईशाद्यागममौलिभाष्यवदिदं सूक्तार्थसंवेदनं
साधु स्यादिति सज्जनप्रियधिया प्राकाश्यमानीयत ॥

ईशाद्युपनिषद्भाष्यपरिष्कारविधायिना ।
श्रीवीरराघवार्येण वात्स्यसच्चक्रवर्तिना ॥

श्रुकुसंख्याधिक्यवालक्ष्यं याजुषकमलादरम् ।
भाष्यं पुरुषसूक्तस्य संग्रहेण परिष्कृतम् ॥

इति पुरुषसूक्तभाष्यपरिष्कारः ।

शुभमस्तु ॥

पुरुषसूक्तार्थसंग्रहकारिकाः

प्रोक्तः पुरुषसूक्ते स पुरुषोऽद्भुतविग्रहः।
प्रकृतिप्राकृतात्मा च त्रिपाद् यस्यामृतं दिवि ॥ १ ॥

ब्रह्माणं जनयित्वा तद्यज्ञसंराधितः श्रुतीः।
लोकान् प्राणभृतो वर्णांश्चतुरो देवतादिकम् ॥ २ ॥

निर्माति निखिलैरीड्यः स्थितः स तमसः परे।
स उपास्यः; ततो मुक्तिः, नान्यः पन्था इतीरितम् ॥ ३ ॥

पुरुषसूक्तमन्त्रसूची

एतावान्	777	पुरुष	775
चन्द्रमाः	790	ब्राह्मणो	789
तं यज्ञं	786	यज्ञेन	793
तस्माद्	788	यत् पुरुषं	78[illegible]
तस्माद् विराड	782	यत् पुरुषेण	7[illegible]4
तस्मादश्वा	78[illegible]	वेदाहं	791
त्रिपात्	780	सप्तास्या	785
धातापुर	791	सहस्र	769
नाभ्या	790		

———

पुरुषसूक्तविषयसूची

पुरुषसूक्तप्रभावः	762—773
पुरुषसूक्तम्	762—801